1055

व्याकरण

ख॰ पत्र-7

11"X5.50"

॥श्रीगणेशायनमः॥ श्रीलक्ष्मीरमणंनौमिगौरीरमणरूपिणम् स्फोटरूपंयतःसर्वंजगदेतद्वि
वर्त्तते १ अशेषफलदातारंभवाब्धितरणेतरिम् शेषाशेषार्थलाभार्थंप्रार्थयेशेषभूष
णम् २ पाणिन्यादिमुनीन्प्रणम्यपितरंरंगोजिभट्टाभिधंद्वैतध्वांतनिवारणादिफलिकांस्तु
त्वाम्बवाग्देवतां ढुंढिगौतमजैमिनीयवचनव्याख्यातृभिर्दूषितान् सिद्धांतानुपपत्तिभिः
प्रकटयेतेषांवचोदूषये ३ प्रारिप्सितप्रतिबंधकोपशमनायकृतेश्रीफणिस्मरणरूपं
मंगलंशिष्यशिक्षार्थंनिबध्नन्चिकीर्षितंप्रतिजानीतिफणिभाषितभाष्याब्धेःशब्दकौ-
स्तुभउद्धृतः तत्रनिर्णीतएवार्थःसंक्षेपेणेहकथ्यते ४ उद्धृतइत्यस्यास्माभिरितिशेषः भा
ष्याब्धेःशब्दकौस्तुभउद्धृतइत्युक्त्याशब्दकौस्तुभोक्तार्थानामाधुनिकोत्प्रेक्षितत्व-
निरासाय अन्यथातन्मूलकस्यास्यग्रंथस्याप्याधुनिकोत्प्रेक्षितत्वापत्तौपाणि
नीयानामनुपादेयतापत्तेः तत्रनिर्णीतइत्युक्तिरितोप्यधिकजिज्ञासुभिःशब्दकौस्तु- १
भेद्रष्टव्यमितिध्वनयितुं १ प्रतिज्ञातमाह फलव्यापारयोर्धातुराश्रयेतुतिङःस्मृताः-

फलेऽप्यधीनेव्यापारस्तिङर्थस्तुविशेषणं धात्वोरित्यत्र स्मृतइति वचनविपरिणामेनान्वयः
फलेऽप्यक्लित्यादिव्यापारस्तुभावनाभिधासाध्यत्वेनाभिधीयमानाक्रिया उक्तंचवाक्यपदी
ये यावत्सिद्धमसिद्धंवासाध्यत्वेनाभिधीयते आश्रितक्रमरूपत्वात्साक्रियेत्यभिधीयत
इति नचसाध्यत्वेनाभिधानेमानाभावः पचतिपाकःकरोतिकिंकरोतिरित्यादौधात्वर्थावगम ।
विशेषेपिक्रियांतराकांक्षानाकांक्षयोर्दर्शनस्यैवमानत्वात् तथाचक्रियांतराकांक्षानु
त्थापकतावच्छेदकरूपंसाध्यत्वंतद्रूपवत्त्वमसत्त्वभूतत्वं एतदेवादायअसत्त्वभूतोभा।
वश्चतिङ्पदैरभिधीयतइतिवाक्यपदीयमितिद्रष्टव्यम् अयंचव्यापारः फूत्कारत्वाधः
संतापनत्वयत्नत्वादितत्तद्रूपेणवाच्यः पचतीत्यादौतत्तत्कारकबोधस्यानुभवसिद्धत्वा
त् नचनानार्थतापत्तिः तदादिन्यायेनबुद्धिविशेषादेः शक्यतावच्छेदकानामनुगमकस्य
सत्वात् आख्यातेक्रियैकत्वमवस्थाप्यवच्छेदकंबुद्धिविशेषैक्यमादायैव उक्तंचवाक्यप
दीये गुणभूतैरवयवैःसमूहः क्रमजन्मनां बुद्ध्याप्रकल्पिताऽभेदक्रियेतिव्यपदिश्यतइति

धात्वर्थनिरूप्यतिङर्थमाह आश्रयेत्विति फलाश्रये व्यापाराश्रये चेत्यर्थः फलाश्रयः क
र्म व्यापाराश्रयः कर्त्ता तत्र फलव्यापारयोर्धातुलभ्यत्वान्न तिङस्तदंशे शक्तिरनन्यलभ्य
त्वात् शक्यतावच्छेदकं चाश्रयत्वं तच्छक्तिविशेषरूपमिति सुबर्थनिर्णये वक्ष्यते नन्वन
पोराख्यातार्थत्वे किं मानं प्रतीतेर्लक्षणयाक्षेपाद्वा प्रथमान्तपदाद्वा सम्भवादिति चेत् अ
त्रोच्यते लः कर्मणि च भावे चाकर्मकेभ्य इति सूत्रमेव मानं अत्र हि चकारात्कर्त्तरि कृदिति
सूत्रोक्तं कर्त्तरीत्यनुकृष्यते बोधकतारूपां तिवादिशक्तिं तत्स्थानित्वेन कल्पिते लकारे
प्रकल्प्य लकाराः कर्मणि कर्त्तरि चानेन विधीयन्ते नकारविसर्गादिनिष्ठां कर्मकरणादिबो 1
धकशक्तिमादाय शसादिविधानवत् न च सूत्रे कर्तृकर्मपदे कर्तृत्वकर्मत्वपरे तथा च कर्तृ
त्वाकृतिः कर्मत्वे च फलमेवार्थोऽस्त्विति शङ्क्यं फलव्यापारयोर्धातुलभ्यत्वेन लकारस्य त
त्र शक्तिकल्पनायोगात् अथ दर्शनान्तरीयरीत्या व्यापारस्य धात्वर्थत्वाभावात्तत्र ल 2
कारविधिः स्यादिति चेत्तर्हि कृतामपि कर्तृकर्मादिवाचित्वं न सिध्येत् कर्त्तरि कृदिति च लः क

र्मणोस्यनेनतुल्ययोगक्षेमं अपिचमीमांसकानांकृतामिवाख्यातानामपिकर्तृकर्मादिवा
चित्वमस्तु भावनायाएवाक्षेपेणकृदादिवत्स्यतीतिसंनवेवाच्यत्वेमास्तुतथासतिप्राधान्यं
तस्यानस्यादितिचेन्न घटमानयेत्यादावाक्षेपितस्यकर्मणोरपिप्राधान्यवदुपपत्तेः पचतीत्या
दौभावनायाविवरणेदर्शनाद्वाच्यत्वमितिचेन्नपाकानुकूलव्यापारवतः कर्त्तुरपिविव
रणेविषयत्वाविशेषात् नचकर्त्तुर्विवरणंतात्पर्यार्थविवरणंपाकंकरोतीत्य शाब्दार्थ
कर्मत्वविवरणवत् इतरेतरद्वंद्वेसाहित्यांशाविवरणवद्वानतदर्थनिर्णायकमितिवाच्य
म् भावनायामपितुल्यत्वात् किंचपचतिदेवदत्तइत्यत्राभेदान्वयदर्शनात्कर्त्तुर्वाच्यत्वम ।
वश्यकं पक्तादेवदत्तइतिवत् नचाभेदबोधेसमानविभक्तिमत्त्वंनियामकंतच्चात्रनास्ती-
तिवाच्यम् सोमेनयजेतस्तोकंपचतिराजपुरुषइत्यादावप्यभेदबोधानापत्तेः नचात्रल
क्षणयाकर्त्तुस्स्फुरत्वात्सामानाधिकरण्यं पिंगाक्षादियौगिकानामपिद्रव्यवाचित्वानाप
त्तेः एवंवैश्वदेवीइत्यादितद्धितानामपिअनेकमन्यपदार्थंसास्यदेवतेत्यनुशासनेनापि-

पिंगेऽक्षिणीयस्याः विश्वेदेवादेवताऽस्याइतिविग्रहदर्शनात्प्रधानषष्ठ्यर्थएवानुशास
नलाभात् तथाचारुणयापिंगाक्ष्यैकहायन्यासोमंक्रीणातीति' वाक्ये द्रव्यानुक्तेरारुण्य
स्यस्ववाक्योपात्तद्रव्यएवान्वयप्रतिपादकारुणाधिकरणोच्छेदापत्तिः द्रव्यवाचकत्वसाध
कमूलत्वयुक्तेः सामानाधिकरण्यस्योक्तरीत्योपपत्तेरितिसंक्षेपः एतच्चविस्तरेणवैयाकरणभूष
णे तिङ्इति बोधकतारूपाशक्तिस्तिङ्ष्वेवेत्यभिप्रेत्येदं पदार्थंनिरूप्यवाक्यार्थंनिरूपय
ति फलेइत्यादि विक्लित्त्यादिफलंप्रतितिङर्थः कर्तृकर्मसंख्याकालाः तत्रकर्तृकर्मणी
व्यापारफलयोर्विशेषणे संख्याकर्तृप्रत्ययेकर्तरि कर्मप्रत्ययेकर्मणि समानप्रत्ययो-
पात्तत्वात् तथाचाख्यातार्थसंख्याप्रकारकबोधंप्रत्याख्यातजन्यकर्तृकर्मोपस्थितेर्हे
तुरितिकार्यकारणभावः फलितः नैयायिकादीनामाख्यातार्थसंख्यायाः प्रथमांतार्थए- ३
वान्वयादाख्यातार्थसंख्याप्रकारकबोधेप्रथमान्तपदजन्योपस्थितिर्हेतुरितिकार्यकारणभा
वोवाच्यः सोपिचंद्रइवमुखंदृश्यते देवदत्तोनुत्स्थाव्रजतीत्यादौचंद्रत्वाद्यर्थयोराख्यातार्थो

त्वाभावनेतिबोधः देवदत्तादिपदस्य योगे त्वाख्यातार्थकर्त्रादिभिस्तदर्थस्याभेदान्वयः
घटो नश्यतीत्यत्रापि घटाभिन्नाश्रयको नाशानुकूलो व्यापार इति बोधः स च व्यापारः
प्रतियोगित्वविशिष्टनाशसामग्रीसमवधानं अत एव तस्यां सत्यां नश्यति तदत्यये नष्टः
तद्भावित्वेन नश्यतीति प्रयोगाः देवदत्तो जानातीच्छतीत्यादौ च देवदत्ताभिन्नाश्रयको
ज्ञानेच्छाद्यनुकूलो वर्तमानो व्यापार इति बोधः स्वांतरा आश्रयत्वैवेति रीत्योह्यं २ न
न्वाख्यातस्य कर्तृकर्मशक्तत्वे पचतीत्यत्रोभयबोधापत्तिः कर्तृमात्रबोधवत्कर्ममात्रस्या
पि वा बोधापत्तिरित्यतस्तात्पर्यग्राहकमाह फलव्यापारयोस्तत्र फले तङ्यक्चिणाद
यः व्यापारे शप्श्नमाद्यास्तु द्योतयंत्याश्रयान्वयं तङादयः फले आश्रयान्वयं द्योतयंति
फलान्वयाश्रयस्य कर्मत्वात्तद्द्योतकाः कर्मद्योतकाः व्यापाराश्रयस्य कर्तृत्वात्तद्द्योतका
कर्तृद्योतका इति समुदायार्थः द्योतयंतीति तात्पर्यग्राहयंति ३ नन्वेवं कमादमुं नारद इत्यबो